इसप्रकार तत्त्वसारायण के अन्तर्गत उपासनाकाण्ड के द्वितीय अध्याय में कथित समस्तवेदों के रहस्यार्थों को प्रकाश करने वाली श्रीरामगीता उपनिषद्का वर्णाश्रमव्यवस्थापन नामक नवम अध्याय समाप्त हुआ॥

कर्मविभागयोगनिरूपणम्।

हनूमानुवाच।

नमस्ते जानकीकान्त भक्तवत्सल राघव।
क्षन्तव्यो मेऽपराधोयं यन्मयाऽऽयासितोस्यहो ॥ १ ॥
श्रोतव्यांशाः पुनश्चात्र वर्तन्ते बहवो मम।
तथापि पश्चाच्छ्रोष्यामि प्रतीक्ष्यावसरं क्रमात् ॥ २ ॥

श्रीराम उवाच।

कपे त्वमिङ्गितज्ञोपि मुग्ध एवासि साम्प्रतम्।
एवं ब्रवीषि मां तत्त्वकथनात्युत्सुकं यतः ॥ ३ ॥
मिथ्याव्याहारजायासलेशहीनस्य मेऽधुना।
वाग्वृत्तयः प्रवर्द्धन्ते स्वानन्दामृतपूरिताः ॥ ४ ॥

हनूमान्‌जी बोले :—हे जानकीनाथ ! हे भक्तवत्सल ! हे रघुनाथजी ! आपको प्रणाम है। अहो ! मैंने आपको जो बहुत कष्ट दिये हैं इस अपराध के लिये आप क्षमा करें ॥१॥ फिर भी मेरे सुनने योग्य बहुतसी बातें हैं; परन्तु अवसर देखकर क्रमशः मैं उनको पीछे से सुनलूंगा ॥ २ ॥ श्रीरामचन्द्रजी ने कहा :—हे कपे ! तुम इङ्गितज्ञ होकर भी इस समय मुग्ध ही हो रहे हो। तत्त्वार्थों के कथन करने में, जब कि मैं अत्यन्त उत्कण्ठित हो रहा हूं तब तुम ऐसा क्यों कहते हो ? ॥ ३ ॥ झूठी गप्पों से होनेवाले परिश्रमका मुझमें लेश भी नहीं है। उलटे इस समय आत्मानन्दरूपी अमृतसे भीगी हुई मेरी वाणीसम्बन्धी वृत्तियाँ बढ़ रही हैं ॥ ४ ॥

तस्मात्त्वं मारुते व्यग्रं परतत्त्वावबोधने।
मामशेषान् यथाकामं प्रष्टव्यान् पृच्छ निर्भयम्॥ ५॥

हनूमानुवाच।

भगवन् सञ्चितागामिप्रारब्धाख्यानि च प्रभो।
कर्माणि त्रिविधान्याहुर्महान्तो रघुनन्दन॥ ६॥
तेषु केचिद्बुधा बोधान्नाशं सञ्चितकर्मणाम्।
आहुर्भोगं विनैवाशु सुखदुःखात्मकं फलम्॥ ७॥
आगामिपुण्यपापानां पश्चादकरणात्परम्।
अश्लेषमेव विद्वद्भिः प्राहुर्वेदान्तपारगाः॥ ८॥
भोगं विना न नाशोस्ति विद्वत्प्रारब्धकर्मणाम्।
हस्तमुक्तेषुवत्प्रोचुरिति तत्त्वविचक्षणाः॥ ९॥

इस कारण हे मारुते! परमतत्त्वको समझाने में लगे हुए मुझसे जो तुम्हारे सब प्रश्न हों सो इच्छानुसार निर्भय होकर पूछो॥ ५॥ हनूमान्जी बोले:—हे भगवन्! हे प्रभो! हे रघुनाथजी! श्रेष्ठ पुरुषों ने सञ्चित, आगामि और प्रारब्ध नामक तीन प्रकार के कर्म कहे हैं॥ ६॥ कुछ विद्वानों के मतसे, उन कर्मों में से सञ्चित कर्मों का नाश ज्ञान प्राप्त होनेसे उनके सुखदुःखात्मक फलके भोगे विना ही शीघ्र होजाता है॥ ७॥ वेदान्त के पारदर्शी पुरुषों का कथन है कि सञ्चित कर्मों के नाश होजाने पर विद्वज्जन पुण्य अथवा पापकर्म्म नहीं करते अतः उनसे आगामिकर्मोंका सम्बन्ध भी नहीं रह सकता॥ ८॥ तत्त्वज्ञानिगण कहतेहैं कि हाथसे छूटेहुए बाण के समान विद्वानों के प्रारब्ध कर्मों का भोग किये विना नाश

अन्ये तु भोगादाद्यानां द्वितीयानां ततः परम्।
तृतीयानां विनाशं चाश्लेषं भोगं विना क्षयम्॥ १०॥
एवं विद्वत्तमप्रोक्तपक्षयोरुभयोरपि।
एकं मुख्यं विनिश्चित्य प्रसीद मम राघव॥ ११॥

श्रीराम उवाच।

साधु पृष्टं महाप्राज्ञ हनूमन् प्रश्नकोविद।
अवश्यं ज्ञेय एवायं प्रश्नो विद्वत्तमैरपि॥ १२॥

नहीं होता*॥ ९॥ अन्य विद्वानों का मत है कि फलभोग से सञ्चित कर्मों का नाश होता है। फिर आगामी कर्मों का नाश उनका उनसे सम्बन्ध न होनेके कारण हुआ ही रहता है और प्रारब्ध कर्मों का भोग के विना ही नाश होजाता है†॥ १०॥ इस प्रकार श्रेष्ठ विद्वानों के कहे हुए दोनों पक्षों में से किसी एकका मुख्य रूप से निश्चय करके हे रघुनाथजी! मुझपर आप प्रसन्नहों॥ ११॥ श्रीरामचन्द्रजी ने कहा:—हे प्रश्न करने में निपुण परम बुद्धिमान् हनूमान्! तुमने बहुत अच्छा पूछा। यह प्रश्न श्रेष्ठ विद्वानों के द्वारा भी अवश्य ही जानने योग्य है॥ १२॥ तुमने कर्म

---

* धनुषधारी के धनुष से लक्ष्यकी ओर छूटे हुए बाण के सदृश-प्रारब्ध कर्म्म, छोड़ने के लिये धनुष में लगे हुए बाण के सदृश क्रियमाण कर्म्म और तुणीर में रक्खे हुए अनेक बाणों के सदृश सञ्चित कर्म्म कहाते हैं। तीसरे सञ्चितकर्म्म आत्मज्ञान से छूट जाते हैं, दूसरे क्रियमाण कर्म्म वासनानाश से छूट जाते हैं और हाथ से छूटे हुए बाण के सदृश प्रारब्ध कर्म्म भोग से ही क्षय होते हैं।

† पहला मत वेदान्तदर्शन का है और यह दूसरा मत युक्त योगियों के सिद्धान्त का है। पक्षान्तर सें दोनों एकही सिद्धान्त पर पहुंचते हैं।

गौणो यः पक्षयोराद्यस्त्वया विद्वन्मुखाच्छ्रुतः।
द्वितीयो यस्तु मुख्यः स्याद्विद्वत्तममुखाच्छ्रुतः॥ १३॥
जीवन्मुक्त्यवधिस्तत्त्वविचारो येषु विद्यते।
तेषां मतं हि पूर्वोक्तं मन्दप्रीतिकरं भवेत्॥ १४॥
विदेहमुक्तिपर्यन्तविचारो येषु विद्यते।
पश्चादुक्तं मतं तेषामुत्तमप्रीतिदं भवेत्॥ १५॥
आद्ये विरोधा बहवस्सन्ति सम्यङ्निरूपिते।
सञ्चितेषु ह्यभुक्तेषु प्रबोधोत्पत्त्यसम्भवः॥ १६॥
आदावुत्पद्यमानस्य ज्ञानस्यावीर्यवत्तया।
शक्तिर्नाशयितुं न स्याद्वीर्यवत् सञ्चितव्रजम्॥ १७॥

मतसम्बन्धी दो पक्ष कहे; उन में से विद्वानों के मुख से तुमने जो पहिला पक्ष सुना वह गौण है और श्रेष्ठ विद्वानों के मुख से जो दूसरा पक्ष सुना, वह मुख्य है॥ १३॥ जिनमें जीवन्मुक्तिपर्यन्त तत्त्वविचार है, उस पक्ष के लोगों का पूर्वोक्त मत विशेष रुचिकर नहीं होगा॥ १४॥ जिनमें विदेहमुक्तिपर्यन्त विचार है, उस पक्ष के लोगों का पीछे कहा हुआ मत उत्तम प्रीतिकर होगा॥ १५॥ भलीभाँति निरूपण करने से प्रथम पक्ष में बहुत विरोध हैं; क्योंकि सञ्चित कर्मों का भोग किये विना ज्ञान की उत्पत्ति होना असम्भव है॥ १६॥ पहिले उत्पन्न हुआ ज्ञान बलहीन होनेके कारण उसमें बलवान् सञ्चित कर्मों का नाश करने की शक्ति नहीं रहती॥ १७॥ सञ्चित कर्म भोग से ही नष्ट

भोगेनैव विनाशश्चेत्प्रायश्चित्तवचो वृथा।
इति चेन्नोपपापानां प्रायश्चित्तक्षयित्वतः॥ १८॥
महतां ब्रह्महत्यादिपापानामस्ति तद्वचः।
इति चेन्नार्थवादत्वात्फलशब्दोऽन्यथा वृथा॥ १९॥
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥ २०॥
इत्येवमादिस्मरणं पूर्वपक्षे विरुध्यते।
ब्रह्मेश्वरगुरूणां च वैषम्यं सम्प्रसज्यते॥ २१॥
फलशब्दोऽर्थवानास्तामप्रायश्चित्तिषु स्वयम्।
इति चेद्बोधनाश्यत्वं प्रसिद्धं कर्मणां वृथा॥ २२॥

होते हैं ऐसा यदि कहें तो प्रायश्चित्तसम्बन्धी शास्त्रीय वचन व्यर्थ हो जायँगे, परन्तु ऐसा नहीं है; क्योंकि प्रायश्चित्त से उपपातक नष्ट होते हैं॥ १८॥ ब्रह्महत्यादि महापातकों के लिये प्रायश्चित्तसम्बन्धी वचन हैं, ऐसा कहें तौभी ठीक नहीं है; क्योंकि वह अर्थवाद है, अन्यथा मानने से फलशब्द वृथा होगा॥ १९॥ किये हुए शुभ या अशुभ कर्मों का फल अवश्य भोगना होगा, यदि वह न भोगा जाय तो करोड़ों कल्पों तक उन कर्मों का क्षय न होगा॥ २०॥ यह पूर्वाचार्यों का सिद्धान्त पूर्व पक्ष का विरोध करता है। ब्रह्म, ईश्वर और गुरुगण का वैषम्य भी उस पक्ष में उपस्थित होताहै॥ २१॥ जिन्होंने प्रायश्चित्त नहीं किया है, उन्हीं के लिये फलशब्द अपने आप सार्थक है, ऐसा यदि कहें तो कर्मों के ज्ञानद्वारा नष्ट होने की जो प्रसिद्धि है, सो व्यर्थ हो जायगी॥ २२॥ वेदों में कहा है कि काश की रुई जिस प्रकार

यथेषीकातूलमग्नाविति श्रुत्याद्यकर्मणाम्।
विषयत्वे कथं तत्र भोगवार्तेति चेच्छृणु ॥ २३ ॥
उपपापानि बोधाग्निर्भस्मसात् कुरुतेऽथवा।
प्रारब्धानीति विद्धि त्वं नान्यथा कपिपुङ्गव ॥ २४ ॥
महापापानि पुण्यानि सकामानि च भोगतः।
यदा नश्यन्त्यशेषाणि ताद्रूप्यात्सञ्चितानि हि ॥ २५ ॥
अत्रैव तत्कृते देहे निष्कामानीतराणि च।
पुण्यानि श्रवणाद्यैस्तज्ज्ञानमुत्पादयन्ति वै ॥ २६ ॥
प्रबलैः प्रतिबन्धानि पुण्यपापानि जाग्रति।
दुर्बलानि फलं पश्चात् स्वप्ने वा ददति स्वयम् ॥ २७ ॥

अग्नि में डालने से जलजाती है, उसी प्रकार कर्म भी ज्ञानाग्नि में जल जाते हैं, इस श्रुति के अनुसार जो कर्मशून्य हो गये हैं, उनके लिये कर्मभोग हो ही नहीं सकता, ऐसा यदि कहें तो सुनो ॥ २३ ॥ ज्ञानाग्नि उपपातकों का अथवा प्रारब्ध कर्मों का नाश करता है, हे कपिपुङ्गव ! तुम इसको अन्यथा न समझो ॥ २४ ॥ महापातक और सकाम पुण्यकर्म जब भोग से नष्ट होजाते हैं, तब समस्त सञ्चित कर्म भी, तद्रूप होने से, नाशको प्राप्त होते हैं ॥ २५ ॥ कर्मों के द्वारा बने हुए इसी देह में निष्काम कर्म और अन्यान्य पुण्यकर्म श्रवण आदि द्वारा निश्चय ही ज्ञान उत्पन्न करते हैं ॥ २६ ॥ ज्ञानप्राप्ति में बाधा देनेवाले पाप पुण्य प्रबल श्रवणादि द्वारा जाग्रदवस्था में फल देते हैं और यदि वे पाप पुण्य दुर्बल हों तो उनका फल स्वप्न में स्वयं होता है ॥ २७ ॥

यस्त्ववस्थात्रयं हित्वा स्वात्मारामोऽनिशं भवेत्।
तज्ज्ञानस्य बलीयस्त्वात् कर्माणि विफलानि वै॥ २८॥
प्रारब्धं सिध्यति तदा यदा देहात्मना स्थितिः।
देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः॥ २९॥
सञ्चितानि बलिष्ठानि प्रारब्धान्यबलानि तु।
आद्यत्वेनान्तिमत्वेन तदसत् पूर्वसम्मतम्॥ ३०॥

जो तीनों अवस्थाओं को छोड़कर अपने आत्मा में अखण्ड रममाण होताहै, उसका ज्ञान बलवान् होने से उसके समस्त कर्म विफल होजात हैं *॥ २८॥ प्रारब्धकर्म तभी तक भोगने पड़ते हैं, जबतक देह के साथ आत्मा का सम्बन्ध होताहै, देहात्मभाव इष्ट नहीं है, इस कारण प्रारब्ध का त्यागकरो॥ २९॥ पहिले सञ्चित कर्म हैं इसलिये वे बलवान् हैं और पीछे प्रारब्ध कर्म हैं इसलिये वे दुर्बल हैं ऐसा मानना पूर्वाचार्यों के मतसे असत् (मिथ्या) है॥ ३०॥ हनूमान्जी बोले:—हे भगवन्! हे

* पूर्वकथित दो पक्ष का सिद्धान्त करने पर विषय वहुत जटिल हो गया है। सुतरां तात्पर्य्य निर्णय की आवश्यकता है। वस्तुतः पहला पक्ष सर्वदर्शनसिद्धान्तों से युक्त है और दूसरा पक्ष केवल उसी का रूपान्तर है और स्वरूपज्ञानका अनुमोदक है। जीवन्मुक्त दशाकी दो अवस्थाएँ दिखाकर उन्हीं के साथ इन दो सिद्धान्तों का समन्वय किया गया है। स्मृति का पक्ष यह है कि कर्म विना भोग के क्षय नहीं होता; अस्तु यदि वेदान्त के सिद्धान्त के सम्बन्ध में यह मानाजाय कि जीवन्मुक्त के सञ्चित कर्म्म और क्रियमाण कर्म्म समष्टि चिदाकाश को आश्रय करके भविष्यत् काल के कारण होते हैं और समष्टि फल उत्पन्न करते हैं जैसा कि भरद्वाज कर्म्ममीमांसा में कहा गया है तो पूर्वकथित शङ्काओं का समाधान अपने आपही हो जायगा और दूसरे पक्षके अनुसार जो यह कहा गया है कि आत्मज्ञानी के तीनों प्रकारके कर्म्म आत्मज्ञान से नष्ट होजाते हैं यह भी यथार्थ ही है क्योंकि आत्मज्ञान के द्वारा स्वरूप की उपलब्धि होते ही उक्त मुक्तात्मा का सञ्चित कर्म्म उसको छोड़कर समष्टि चिदाकाश में पहुँच जाता है और आत्मज्ञान से उत्पन्न निष्काम अन्तःकरण में पुनः आगामी क्रियमाण कर्म्म अपना सम्बन्ध स्थापन करही नहीं सके हैं और आत्मा में युक्त रहने से प्रारब्ध कर्मका भोग वस्तुतः भोग के समान नहीं होता। शरीराध्यास न रहने से प्रारब्ध कर्म्म भोग होने पर भी अनुभव में नहीं आते। यही दोनों सिद्धान्तों का समन्वय है।

हनूमानुवाच।

भगवन् रघुशार्दूल विनियोगस्तु कर्म्मणाम्।
साधुरेव त्वया प्रोक्तस्तथाप्यन्योऽस्ति संशयः॥ ३१॥
सुहृद्द्विषन्तौ विदुषः पुण्यपापेऽत्र गच्छतः।
इति श्रौतोयमर्थस्तु विरुद्धः पक्षयोर्द्वयोः॥ ३२॥
भोगतो ज्ञानतश्चैषां सञ्चितारब्धकर्मणाम्।
विनाशे कथमन्यत्र विनियोगोऽरिमित्रयोः॥ ३३॥

श्रीराम उवाच।

लोकसङ्ग्रहबुद्ध्यैव सम्यग्ज्ञानोदयात्पुरा।
पश्चाच्च क्रियमाणानि यानि नैमित्तिकानि तु॥ ३४॥
तान्यात्माऽनुपभुक्तत्वादनष्टत्वाच्च बोधतः।
पुण्यकर्माणि सुहृदः प्रयान्ति कपिपुङ्गव॥ ३५॥

रघुशार्दूल! कर्मोंका विनियोग आपने अच्छा ही कहा है; तथापि मुझे एक और सन्देह है॥ ३१॥ विद्वानों (आत्मज्ञानियों) के पुण्य और पाप उनके मित्र और शत्रुओं में चले जाते हैं, यह जो श्रुतिकथित सिद्धान्त है, वह दोनों पक्षों के विरुद्ध है॥ ३२॥ आत्मज्ञानियों के सञ्चित और प्रारब्ध कर्मों का जब भोग और ज्ञानसे नाश होजाता है, तब उनका दूसरे जो शत्रु और मित्र हैं उनमें विनियोग कैसे होगा?॥ ३३॥ श्रीरामचन्द्रजी ने कहाः— सम्यग्ज्ञान का उदय होने के पहिले या पीछे, लोकसंग्रह की बुद्धि रखकर ही जो नैमित्तिक रूप से क्रियमाण पुण्य कर्म हों, वे आत्माद्वारा उपभुक्त अथवा ज्ञानद्वारा नष्ट न होनेके कारण हे कपिपुङ्गव! मित्रों में चले जाते हैं॥ ३४-३५॥ लोकसंग्रहकी

लोकसङ्ग्रहधीहीनैर्विद्वद्भिरकृतानि च।
नैमित्तिकानि कर्माणि यानि काम्यानि चाभवन् ॥ ३६ ॥
तानि चानुपभुक्तत्वादनष्टत्वाच्च बोधतः।
पापकर्माण्यसुहृदः तेषां यान्ति मरुत्सुत ॥ ३७ ॥
नैतानि पुण्यपापानि सञ्चितान्तर्गतानि च।
नारब्धान्तर्गतानि स्युर्नागामीति पृथक्त्वतः ॥ ३८ ॥

बुद्धि न रखकर विद्वानों द्वारा किये न जानेवाले अर्थात् आत्मज्ञानप्राप्ति के पूर्व किये हुए जो नैमित्तिक अथवा काम्य पाप कर्म हुए हैं उनका भोग न होनेसे अथवा ज्ञान के द्वारा उनका नाश न होनेसे आत्मज्ञानियों के ऐसे पापकर्म, हे वायुपुत्र! उनके शत्रुओं में चले जाते हैं * ॥ ३६–३७ ॥ वे पुण्य पाप पृथक् होनेके कारण अर्थात् मित्र और शत्रुओं में चले जाने के कारण न सञ्चित के अन्तर्गत हैं, न प्रारब्ध के और न आगामी के ही अन्तर्गत हैं ॥ ३८ ॥ परोक्ष ज्ञानियों के ये सब पुण्य पाप उनके

* तात्पर्य्य यह है कि जब जीवन्मुक्त यह अनुभव कर लेता है कि मैं स्वस्वरूप आत्मा हूँ शरीर नहीं हूँ तब स्वतः ही शरीरसम्बन्धीय चित्ताकाश में जमनेवाले कर्मसमूह उस जीवन्मुक्त को भोगप्रदान करने में असमर्थ हो जाते हैं; परन्तु कर्म विना प्रतिक्रिया उत्पन्न किये नष्ट नहीं होते इसकारण वे उस जीवन्मुक्त व्यक्ति के चित्ताकाश में स्थान न पाकर ब्रह्माण्ड चिदाकाश को आश्रय करके अन्य के भोगोपयोगी बनजाते हैं। ऐसे समय में वे जीवन्मुक्त महापुरुष जो साक्षात् ब्रह्मस्वरूप हैं उनको दुःख देनेवालों में उनके असत् क्रियमाण कर्म और उनकी सेवा करनेवालों में उनके सत् क्रियमाण कर्म्म पहुँच सक्ते हैं। इसका कारण यह है कि ऐसे ब्रह्ममूर्त्ति महापुरुष की सेवा करना अथवा उनको क्लेश देना एक प्रबल कर्म्म अवश्य ही होगा और प्रबलकर्म्म तुरत फल उत्पन्न करनेवाले हैं। और प्रबल उग्र कर्म्म दैवप्रेरणा से असाधारण शैली पर उत्पन्न होते हैं यह शास्त्र कहता है। वही असाधारण शैली उक्त कर्मों को चिदाकाश से खैंचकर उक्त साधुभक्त या साधुनिन्दक व्यक्ति में देवताओं के द्वारा पहुँचा दिया करती है। "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते" यही इसकी मीमांसा है।

परोक्षज्ञानिनश्चैते पुण्यपापेऽरिमित्रयोः।
अर्धमार्गे प्रयाणे च प्रयात इति गम्यते॥ ३९॥
एताभ्यां साध्वसाधुभ्यां कर्मभ्यां परमात्मवित्।
न लिप्यते परार्थत्वात्पद्मपत्रमिवाम्भसा॥ ४०॥
प्राक्प्रबोधात्कृतान्यत्र नित्यकर्माण्यथापि च।
प्रबोधस्य च मोक्षस्य सहकारीणि मारुते॥ ४१॥

हनूमानुवाच।

प्रबोधसहकारित्वमुचितं नित्यकर्मणाम्।
न मोक्षसहकारित्वं श्रूयते राघव क्वचित्॥ ४२॥
काष्ठदाहेऽन्नपाके च स्वतन्त्रोऽग्निर्यथा भवेत्।
कर्मक्षयेऽपि मुक्तौ च प्रबोधो हि तथा भवेत्॥ ४३॥

जीवनके मध्य में या अन्त समय में उनके मित्र और शत्रुओं में जाते हुए जाने जाते हैं॥ ३९॥ परमात्मवेत्ता इन अच्छे बुरे कर्मोंसे निष्काम होने के कारण जलमें कमलपत्र के सदृश लिप्त नहीं होते॥ ४०॥ ज्ञानोदय के पहिले जो कुछ नित्यकर्म यहाँ किये गये हों, हे मारुते! वे ज्ञान और मोक्ष के सहकारी अर्थात् सहायक होते हैं॥ ४१॥ हनूमान्‌जी ने कहा:—हे रघुनाथजी! नित्यकर्मों का ज्ञानका सहकारी होना ठीक ही है, परन्तु उनका मोक्षका सहकारी होना कहीं नहीं सुनागया॥ ४२॥ जिस प्रकार लकड़ी को जलाना और अन्नको पकाना, इन दोनों कर्मों के करने में अग्नि स्वतन्त्र है, उसी प्रकार ज्ञान ही कर्मोंका क्षय तथा मुक्ति प्रदान करने में समर्थ है॥ ४३॥ हे विभो! यदि ज्ञान

बोधस्सप्रतिबन्धश्चेत्कर्मापेक्षोपपद्यते।
अत्र निष्प्रतिबन्धस्य तदपेक्षा कथं विभो॥ ४४॥
न किञ्चिदपि कर्तव्यं सम्यग्ज्ञानोदयात्परम्।
इति वेदान्तसिद्धार्थे व्यभिचारः कथं भवेत्॥ ४५॥

श्रीराम उवाच।

अरूपनाशासंसिद्धेस्सम्यग्ज्ञानेन्द्रियाण्यनु।
प्रवर्त्तन्ते बहिः स्वार्थेष्वञ्जनासुत सर्वतः॥ ४६॥
स्वेच्छाविहारासिद्ध्यर्थं विद्वाँस्तानीन्द्रियाण्यलम्।
वर्णाश्रमोचितैर्धर्मकामार्थैरुपलालयेत्॥ ४७॥
अरूपनाशो नैतेषां यावज्जातस्समाधिभिः।

प्रतिबन्धसहित हो तो कर्मकी अपेक्षा हो सकती है, परन्तु जब ज्ञान प्रतिबन्धरहित है अर्थात् विशुद्ध है तब कर्म की अपेक्षा क्योंकर होगी? ॥ ४४ ॥ सम्यक् ज्ञान होने के पश्चात् कुछ भी कर्तव्य नहीं रहता, यह जो वेदान्त का सिद्धान्त है, उसका खण्डन कैसे हो सकेगा?॥४५॥ श्रीरामचन्द्रजी बोलेः—हे अञ्जनी-पुत्र! जबतक भलीभाँति अरूपनाश की सिद्धि नहीं हुई है तब तक ज्ञानेन्द्रियाँ बाहर सब ओर स्वार्थों में प्रवृत्त होती हैं अर्थात् अपने अपने विषयों के पीछे लगी रहती हैं ॥ ४६ ॥ वे इन्द्रियाँ स्वेच्छाविहार न करसकें, इसलिये वर्णाश्रमोचित धर्म काम और अर्थके द्वारा विद्वान् पुरुष उनका भलीभाँति लालन करे ॥ ४७ ॥ समाधियों के द्वारा जबतक इन इन्द्रियों का अरूप नाश न हो,

तावन्नित्यानि कर्माणि प्रबोधोऽपेक्षते भृशम् ॥ ४८ ॥
अतो न किञ्चित्कर्त्तव्यं नित्यकर्मेतरद्बुधैः ।
इति त्वं विद्धि वेदान्तवाणीमव्यभिचारिणीम् ॥ ४९ ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
लालने ह्युत्तमं श्रेयः स्वाश्रमोचितकर्मभिः ॥ ५० ॥
कायिकं वाचिकं कर्म यदि मानसिकं क्रमात् ।
संसृज्येत प्रबोधेन विदुषस्सा त्वलङ्क्रिया ॥ ५१ ॥
अरूपनष्टचित्तासुकरणस्स विदुत्तमः ।
आभ्यां विधिनिषेधाभ्यां न बाध्येत कदाचन ॥ ५२ ॥
स्वल्पाप्यारब्धभोगेच्छा वर्त्तते विदुषो यदि ।

तबतक ज्ञान नित्यकर्मों की अत्यन्त ही अपेक्षा करता है ॥ ४८ ॥ इसकारण आत्मज्ञानसम्पन्न पुरुष नित्यकर्मों को छोड़कर और कोई भी कर्म न करे; इस अविरोधी वेदान्तवाणी को तुम समझ लो ॥ ४९ ॥ इन्द्रियाँ स्वाभाविकरूप से विषयों में भटकती रहती हैं, उनका अपने आश्रमोचित कर्मों द्वारा लालन करते रहना ही परम कल्याणकारी है ॥ ५० ॥ ज्ञान के द्वारा यदि कायिक, वाचिक और मानसिक कर्म क्रमशः छूट जायँ, तो आत्मज्ञानी के लिये वह भूषण है ॥ ५१ ॥ तत्त्वज्ञानियों में श्रेष्ठ जिस पुरुष की अरूपभाव से चित्त प्राण और इन्द्रियाँ नष्ट हो गई हैं, उसे ये विधिनिषेध कभी बाधा नहीं करते ॥ ५२ ॥ हे बुद्धिमान् ! आत्मज्ञानी को यदि थोड़ी भी प्रारब्धकर्मों के

अवश्यं स्वाश्रमाचार इति विद्धि विचक्षण ॥ ५३ ॥
अवधार्य मदुक्तार्थान् मनस्येवं पुनश्च माम्।
प्रष्टव्यान् परिपृच्छ त्वं मा शङ्किष्ठाः कपीश्वर ॥ ५४ ॥

इति तत्त्वसारायण उपासनाकाण्डस्य द्वितीयपादे सर्ववेद-रहस्यार्थासु श्रीरामगीतासूपनिषत्सु कर्मविभागयोग-निरूपणं नाम दशमोऽध्यायः ॥

भोगने की इच्छा हो, तो उसके लिये अपने आश्रमानुकूल आचार आवश्यक हैं* सो जानो ॥ ५३ ॥ इसप्रकार मेरे कहेहुए अर्थों को मन में भलीभाँति दृढ़करके फिर तुम्हें जो कुछ पूछना हो सो हे कपीश्वर ! निःशङ्क होकर तुम मुझसे पूछो ॥ ५४ ॥

इस प्रकार तत्त्वसारायण के अन्तर्गत उपासनाकाण्ड के द्वितीय पाद में कथित समस्त वेदों के अर्थों को प्रकाश करनेवाली श्रीरामगीताउपनिषद्का कर्मविभागयोगनिरूपण नामक दशम अध्याय समाप्त हुआ ॥

---

* कर्म की ओर दृष्टि के विना कर्म का भोग असम्भव है अतः जिन ईशकोटिके जीवन्मुक्त पुरुषों में जगत्कल्याणबुद्धि उपस्थित है उनमें कर्मपर दृष्टि भी अवश्य बनी रहेगी । जब कर्मपर दृष्टि बनी रहेगी तो ज्ञानी अवश्यही सम्बद्ध कर्म करेगा, असम्बद्ध कर्म उससे नहीं होसक्ता । सुतरां वर्णाश्रमधर्मोचित कर्म अथवा अन्यान्य शुभ कर्म की ओरही उसकी स्वाभाविक प्रवृत्ति रहेगी ।

गुणत्रयविभागयोगनिरूपणम्।

हनूमानुवाच।

गुरूणां च गुरो श्रीमन् रामचन्द्र दयानिधे।
किं वक्ष्ये भक्तवात्सल्यं तव वाचामगोचरम्॥ १॥
यन्मामपारसंसारसागरे मग्नमीदृशम्।
उत्तारयितुमत्यन्तं बद्धश्रद्धोऽसि सादरम्॥ २॥
सत्त्वं रजस्तमश्चेति प्रसिद्धं हि गुणत्रयम्।
कर्मिणस्सन्ति भक्ताश्च ज्ञानिनो योगिनस्तथा॥ ३॥
तेषां चतुर्णां सत्त्वादिगुणैर्भेदेन संस्थितिम्।
फलञ्च विस्तरेणैव मम ब्रूहि रघूत्तम॥ ४॥

श्रीराम उवाच।

सात्त्विकाः कर्मिणो लोके श्रुतिस्मृत्युक्तकर्मभिः।

हनूमान्‌जी बोलेः—हे गुरुओं के भी गुरु! हे दयानिधि श्रीमान् रामचन्द्रजी! वाणी से भी अगोचर आपका भक्तवात्सल्य मैं क्या कहूँ? क्योंकि आप, अपार संसारसागर में डूबे हुए मुझे इस प्रकार उबारने के लिये आदर के साथ अत्यन्त सचेष्ट हो रहे हैं॥ १-२॥ सत्त्व, रज और तम ये तीन गुण प्रसिद्ध ही हैं। कर्मी, भक्त, ज्ञानी तथा योगी ये चार प्रकार के मुमुक्षु होते हैं॥ ३॥ इन चारों की सत्त्वादि गुणों के कारण पृथक्रूप से जो स्थिति और फल होता है, सो हे रघुश्रेष्ठ! आप मुझे विस्तार के साथ कहिये॥ ४॥ श्रीरामचन्द्रजी ने कहाः—संसार में सात्त्विक कर्मी असङ्ग (सङ्गरहित) होतेहुए श्रुति स्मृति कथित

नित्यैरसङ्गा मां विष्णुं प्रीणयन्ति जनार्द्दनम् ॥ ५ ॥
ते क्रमेणैव संशुद्धचित्ता वेदान्तवर्त्मना ।
मामेष्यन्ति चिदानन्दं परमात्मानमव्ययम् ॥ ६ ॥
अन्ये तु राजसाः स्वर्गकामाश्श्रौतानि कर्मिणः ।
इन्द्रादिदेवताप्रीत्यै यज्ञादीन्याचरन्ति वै ॥ ७ ॥
ते भुक्त्वा भोगमतुलं स्वर्गलोके सुरैस्सह ।
क्षीणे पुण्य इमं लोकमावर्त्तन्ते पुनर्ध्रुवम् ॥ ८ ॥
ये चान्ये तामसाः काम्यकर्मैकनिरता भृशम् ।
कुटुम्बपोषणे सक्ताः वित्तैः कर्मार्जितैस्सदा ॥ ९ ॥
ते यान्ति नरकं घोरं चित्रगुप्तादिरक्षितम् ।

नित्यकर्मों द्वारा मुझ जनार्दन विष्णु को प्रसन्न करते हैं ॥ ५ ॥ और वे ही क्रमशः विशुद्धचित्त होते हुए वेदान्तमार्ग से मुझ चिदानन्दस्वरूप अव्यय (जिसका नाश नहीं) परमात्मा में आ मिलते हैं ॥ ६ ॥ स्वर्ग की इच्छा करनेवाले अन्य राजसिक कर्मी इन्द्रादि देवताओं की प्रसन्नता के हेतु श्रुत्युक्त यज्ञादि करते हैं ॥ ७ ॥ वे स्वर्गलोक में देवताओं के साथ अतुल (जिसकी तुलना नहीं) भोग को भोगकर पुण्यक्षय होनेपर इसी लोक में निश्चय ही पुनः लौट आते हैं ॥ ८ ॥ और जो अन्य तामसिक कर्मी निरन्तर केवल काम्यकर्मों में ही लगे रहते हैं और कर्मों से कमाये हुए धन द्वारा कुटुम्ब पालन में सदा व्यस्त रहते हैं ॥ ९ ॥ वे चित्रगुप्त आदि से रक्षित घोर नरक में जाते हैं और पश्चात्

ततः प्रत्यवरोहन्ति श्वादियोनिमधोमुखाः ॥ १० ॥
ये चान्ये सात्त्विका भक्ताः शङ्खचक्रगदाधरम् ।
ध्यानादिभिर्भजन्ते मां निष्कामाश्श्रुतिघोषितैः ॥ ११ ॥
मल्लोकं पार्षदैर्नीता मत्तो लब्धात्मवेदनाः ।
मया सहैव ते यान्ति मम तत्परमं पदम् ॥ १२ ॥
येऽन्ये च राजसा भक्ता बहुशिष्यसमन्विताः ।
भजन्ते मां हरिं बाह्यैः प्रतीकेष्वर्चनादिभिः ॥ १३ ॥
मत्सालोक्यं च ते गत्वा भोगान् ब्रह्मादिदुर्लभान् ।
भुक्त्वा पुनश्च जायन्ते विशुद्धब्राह्मणान्वये ॥ १४ ॥

अधोमुख होकर श्वान आदि की योनि में पहुँचते हैं * ॥ १० ॥ अन्य जो सात्त्विक भक्त हैं, वे निष्काम होकर शङ्ख चक्र गदाधारी मुझको, वेदों में कथित ध्यान आदि से भजते हैं ॥ ११ ॥ वे पार्षदों द्वारा मेरे लोक में पहुँचकर और मुझसे आत्मसाक्षात्कार प्राप्तकर मेरे साथ ही मेरे उस परमपद को प्राप्त करते हैं ॥ १२ ॥ अन्य जो राजसिक भक्त हैं वे बहुत से शिष्यों को साथ लेकर, प्रतिमाओं में बाह्यपूजादि द्वारा मुझ हरि को भजते हैं ॥ १३ ॥ वे मेरे सालोक्य (वैकुण्ठ) को प्राप्त करके ब्रह्मा आदि देवताओं के लिये भी दुर्लभ भोगों को भोगकर पुनः विशुद्ध ब्राह्मणकुल में उत्पन्न होते हैं ॥ १४ ॥ अन्य जो भक्तवेषधारी तामसिक भक्त

* केवल परमात्मा की प्रसन्नतार्थ कर्त्तव्यबुद्धि से कर्म में रत कर्मी सात्त्विक कहाता है। ब्रह्मोपासक और सगुण पञ्चोपासक ज्ञानी भक्त ही प्रथम श्रेणी के कर्मी कहाते हैं। ऋषि देवता और पितरों के उपासक सकाम कर्म में निरत आर्त्त जिज्ञासु अर्थार्थी उपासकगण द्वितीय श्रेणी के कर्मी बनते हैं। वे भी कर्मी हैं परन्तु इहलोक और परलोक दोनों का अभ्युदय चाहनेवाले होते हैं । परन्तु तीसरी श्रेणी के घोर सकामकर्मी वे कहाते हैं जिनको अपने परलोक के अभ्युदय पर ध्यान न रहे और केवल इस लोक के अभ्युदय के लिये ही सकाम कर्म्म में रत रहें।

ये चान्ये तामसा भक्ताः भक्तवेषैस्समन्विताः।
श्रौताचारविहीनाश्च वित्ताद्यर्थं भजन्ति माम्॥ १५॥
ते चात्र पामरैस्तुल्या गत्वैव नरकं पुनः।
श्वादिजन्म प्रपद्यन्ते ह्यन्तःप्रच्छन्नपापतः॥ १६॥
ज्ञानिनस्सात्त्विका ये स्युर्वैराग्यादिविभूषिताः।
ब्रह्मैक्यमनने निष्ठास्स्वाश्रमाचारभासुराः॥ १७॥
यतयो गृहिणो वान्ये ते मल्लोकं सुदुर्लभम्।
प्राप्य चान्ते मया साकं यान्ति तन्मत्पदं परम्॥ १८॥

हैं और जो वेदकथित आचारों से विमुख होकर धनादि के लिये मुझे भजते हैं॥ १५॥ वे इस लोक में नीच हैं और नरक में जाकर ही—उनके हृदय में पाप छिपे हुए होने के कारण—वे पुनः श्वान आदि की योनियों को प्राप्त करते हैं *॥ १६॥ जो सात्त्विक ज्ञानी हैं, वैराग्य आदि से विभूषित हैं, जीव ब्रह्म की एकता के विचार में मग्न हैं, अपने आश्रमसम्बन्धी आचारों से तेजस्वी हैं॥ १७॥ चाहे वे संन्यासी हों, गृहस्थ हों या और कोई हों, वे अत्यन्त दुर्लभ मेरे लोक में पहुँच कर अन्त में मेरे साथ मेरे उस परमपद को प्राप्त करते हैं॥ १८॥ अन्य जो राजसिक ज्ञानी हैं,

---

* इसी प्रकार भक्त भी तीन श्रेणी के कहे गये हैं। निष्काम ज्ञानी भक्त अन्तर्यागपरायण साधक सात्त्विक कहाता है। आर्त्त जिज्ञासु अर्थार्थी सकाम भक्त बहिर्यागपरायण उपासक अनन्यभक्ति द्वारा सालोक्य सारूप्य आदि गति को प्राप्त करके पुनः ज्ञानवान् ब्राह्मणदेह को प्राप्त करता है। यही द्वितीय श्रेणी के राजसिक पुण्यात्मा भक्त हैं। और केवल ऐहलौकिक सुख की इच्छा करनेवाले भगवत्स्वरूप-ज्ञानहीन अज्ञ उपासक तृतीय श्रेणी के हैं।

ज्ञानिनो राजसा येऽन्ये संसारासक्तचेतसः।
शिष्यैः परिवृताश्श्रौतान्स्मरन्त्यर्थान् कदाचन ॥ १९ ॥
तेऽपि भुक्त्वा महाभोगान् मल्लोके पुनरत्र च।
जातास्सद्यो विमुच्यन्ते पूर्ववासनयान्विताः ॥ २० ॥
ज्ञानिनस्तामसा येऽन्ये विषयासक्तमानसाः।
शूद्रादीनां च वेदार्थं कथयन्त्यर्थलब्धये ॥ २१ ॥
ते च भुक्त्वा महाघोरं रौरवं नरकं ततः।
श्वादिजन्म प्रपद्यन्ते वेदसन्दूषणाद्भृशम् ॥ २२ ॥
योगिनस्सात्त्विका ये स्युः निदिध्यासनतत्पराः।

जिनका कि चित्त संसार में लगा हुआ है और जो शिष्यों के साथ वेदार्थों का कभी कभी चिन्तन किया करते हैं ॥ १९ ॥ वे भी मेरे लोक में श्रेष्ठ भोगों को भोगकर, पुनः इस लोक में जन्म ग्रहण करते हैं और पूर्व शुभ वासनाओं से युक्त होने के कारण शीघ्रही मुक्त होजाते हैं ॥ २० ॥ अन्य जो तामसिक ज्ञानी हैं, जिनका कि चित्त विषयों में आसक्त है और जो धनप्राप्ति के लिये शूद्र आदि को वेदार्थ कहते हैं ॥ २१ ॥ वे महाघोर रौरव नरक को भोगने के पश्चात् वेदों को अत्यन्त कलङ्कित करने के कारण श्वान आदि की योनियों को प्राप्त करते हैं * ॥ २२ ॥ जो सात्त्विक योगी होते हैं वे इच्छारहित होकर (ब्रह्म के) निदिध्यासन में ही

---

* तत्त्ववेत्ता आत्मज्ञानी प्रथम श्रेणी के ज्ञानी कहाते हैं। परोक्षज्ञानी श्रद्धालु व्यक्ति द्वितीय श्रेणी के ज्ञानी कहाते हैं और अन्तःश्रद्धाविहीन केवल शास्त्रसम्बन्ध से पाण्डित्याभिमानी व्यक्ति तीसरी श्रेणी का ज्ञानी है। यही ग्रन्थकार का लक्ष्य है।

अपरोक्षात्मलाभेन प्रसन्ना विगतस्पृहाः ॥ २३ ॥
प्रारब्धदेहपाते ते विनोत्क्रान्त्यादिकं मम।
सर्ववेदान्तसंसिद्धं यान्ति तत्परमं पदम् ॥ २४ ॥
योगिनो राजसा येऽन्ये सदसि ध्याननिष्ठया।
मनोनाशादिहीनाश्च ध्येयव्याकुलमानसाः ॥ २५ ॥
अनुभूयोत्कटं दुःखमिह प्रारब्धजं च ते।
देहादमुष्मादुत्क्रम्य यान्ति मे परमं पदम् ॥ २६ ॥
योगिनस्तामसा येऽन्ये ब्रह्मध्यानेष्वनादराः।
अभानावरणाक्रान्ता अणिमादिरताशयाः ॥ २७ ॥
दुराचाराप्रसक्तेस्ते मल्लोके परमं सुखम्।

तत्पर रहकर अपरोक्षज्ञानलाभ से प्रसन्न होते हैं ॥ २३ ॥ वे प्रारब्धजनित देह का अन्त होने पर उत्क्रान्ति आदि के विना ही समस्त वेदान्तों से सिद्ध मेरे उस परम पद को प्राप्त करते हैं ॥ २४ ॥ अन्य जो राजसिक योगी हैं, सभा में अर्थात् सब लोगों के सामने मनोनाशादि से विहीन होने पर भी ध्याननिष्ठा से जिनका चित्त ध्येयप्राप्ति के लिये व्याकुल है ॥ २५ ॥ वे इस लोक में प्रारब्धजन्य उत्कट दुःख का अनुभव कर, इस देह का त्याग करने के उपरान्त मेरे परम पद को प्राप्त करते हैं ॥ २६ ॥ अन्य जो तामसिक योगी हैं, ब्रह्मध्यान में जिनका कि आदर नहीं, अणिमादि सिद्धियों में ही लगे रहने की जिनकी इच्छा है और अभान (अज्ञान) के आवरण से जो आक्रान्त हैं ॥ २७ ॥ दुराचारों में आसक्त न होने के कारण वे मेरे लोक में श्रेष्ठ सुख का अनुभव कर फिर भूलोक में आते हैं और पुनः एक जन्म के पश्चात् मुझ

अनुभूय ततो भूमौ मां यान्त्येकेन जन्मना ॥ २८ ॥
कार्यकारणभेदेन विकृताविकृतात्मना।
विज्ञेयाःषड्विधाः प्राज्ञैस्त्रयस्सत्त्वादयो गुणाः ॥ २९ ॥
एतेषु कार्यत्रिगुणसम्पन्ना योगिनस्त्रयः।
कारणत्रिगुणोपेता जीवन्मुक्तास्त्रयः क्रमात् ॥ ३० ॥
ये चोक्ताः कर्मिणो भक्ता ज्ञानिनो नव मारुते।
त्रिवृत्कृतगुणोपेतास्ते विज्ञेया विलक्षणाः ॥ ३१ ॥
यथा त्रिवृत्कृता विश्वतैजसप्राज्ञसंज्ञिकाः।
जीवा नवविधाः प्रोक्ता अविद्याकार्यरूपिणः ॥ ३२ ॥

को प्राप्त करते हैं * ॥ २८ ॥ 'विकृत' और 'अविकृत' रूप कार्य-कारणभेदानुसार सत्त्वादि तीन गुण द्विविध होने के कारण विद्वानों को उक्त गुण छः प्रकार के समझने चाहिये ॥ २९ ॥ इन में से कार्यरूप त्रिगुणों से युक्त तीन प्रकार के योगी होते हैं और कारणरूप त्रिगुणों से युक्त क्रमशः तीन प्रकार के जीवन्मुक्त होते हैं † ॥ ३० ॥ हे मारुते! जो कर्मी, भक्त और ज्ञानी नौ प्रकार के कहे गये हैं, उनको तीन तीन गुणों से युक्त और विशेष लक्षणों से युक्त जानो ॥ ३१ ॥ जैसे कि विश्व, तैजस और प्राज्ञ नामक तीन तीन गुणित अविद्या के कार्यस्वरूप जीव नव प्रकार के कहेगये हैं ॥ ३२ ॥

* राजयोगी सात्त्विक है, मन्त्रयोगी, हठयोगी और लययोगी राजसिक श्रेणी के माने गये हैं और केवल सिद्धि की इच्छा से योगसाधन करनेवाला व्यक्ति तामसिक योगी है यही ग्रन्थकार का तात्पर्य्य है।

† इन छः भेदों में से तीन क्रियायोगप्रधान हैं और तीन ज्ञानयोगप्रधान हैं ऐसा समझने से समन्वय होगा।

यथा च ब्रह्मविष्णवीशाः प्रसिद्धास्ते त्रिवृत्कृताः।
ईशा नवविधाः प्रोक्ता मायाकार्यैकरूपिणः॥ ३३॥
तथा गुणैः सत्त्वरजस्तमोभिख्यैस्त्रिवृत्कृतैः।
स्वकार्यरूपैस्संयुक्ताः कर्म्याद्याश्च नवेरिताः॥ ३४॥
अजामन्त्रोदिता शक्तिश्चिन्मयी प्रकृतिस्तथा।
त्रिपात्तत्त्वामृतञ्चोक्तमत्र बीजगुणत्रयम्॥ ३५॥
कैश्चिद्गुणत्रयस्यास्य मायाकार्यत्वमुच्यते।
अविद्याकार्यता चैतत्तद्बीजत्वादसङ्गतम्॥ ३६॥
कार्यकारणरूपेभ्यः षड्विधेभ्य इहेतरे।

जैसे कि प्रसिद्ध जो ब्रह्मा, विष्णु, महेश हैं उनके त्रिगुणित होने से ईश नवविध कहे गये हैं, जो माया के कार्यस्वरूप हैं॥ ३३॥ वैसेही सत्त्व, रज और तम इन तीन गुणों से त्रिगुणित स्वकार्यरूपों से युक्त कर्मी आदि भी नव प्रकार के कहे गये हैं॥ ३४॥ संसार में अजामन्त्र (अजामेकामित्यादि) में कथित जो शक्ति, चिन्मयी और प्रकृति है, वही तीन कारणगुणरूपा त्रिपात्तत्त्वामृत कही गई है॥ ३५॥ कोई कहते हैं कि ये तीनों गुण माया के कार्यस्वरूप हैं और कोई कहते हैं कि ये अविद्या के कार्यस्वरूप हैं परन्तु यह मत असङ्गत है; क्योंकि उक्त गुण मायाकार्य और अविद्याकार्य के बीज (कारण) स्वरूप हैं *॥ ३६॥ कार्यकारणरूप छः प्रकार के गुणों के अतिरिक्त जो तीन तीन प्रकार

* इस विज्ञान का समन्वय यही है कि ब्रह्मप्रकृति त्रिगुणमयी है, साम्यावस्था ही उनका यथार्थ स्वरूप है; परन्तु कार्यदशा में वही ब्रह्मप्रकृति विद्या और अविद्या नाम को प्राप्त होती है। बुद्धि में स्थित सत्त्वगुणमयी विद्या कहाती है और मन में स्थित तमोगुणमयी अविद्या कहाती है।

त्रिवृत्कृता गुणाः प्रोक्तास्ते हेयास्तु मुमुक्षुभिः ॥ ३७ ॥
गुणसामान्यबुद्ध्यात्रालब्धकार्यगुणा अपि ।
उदासते बीजगुणानपि ते ज्ञानवञ्चकाः ॥ ३८ ॥
सच्चिदानन्दरूपांस्तान्मद्गुणांस्त्रींश्च मारुते ।
ब्रह्माऽमरेशप्रमुखा अपि नित्यमुपासते ॥ ३९ ॥
तस्मात्त्वमादरेणैव मद्वाक्येषु कपीश्वर ।
उपास्स्व जीवन्मुक्त्यर्थं कारणं मद्गुणत्रयम् ॥ ४० ॥
गुणा इमेऽस्मिन् गुणशब्दभाजोऽ-
प्यन्यत्र सत्येऽगुणशब्दभाजः ।
अन्यत्त्वितो निष्प्रतियोगिकन्तद्-
गुणाऽगुणाख्यापददूरमासीत् ॥ ४१ ॥

के और भी गुण यहां कहे गये हैं, वे तो मुमुक्षुओं के लिये त्याज्य हैं ॥ ३७ ॥ कार्यगुण और कारणगुण दोनों समान ही हैं ऐसी साधारण बुद्धि रखकर कार्यगुणों को प्राप्त न करके भी जो कारण-गुणों से उदासीन हो गये हैं, वे ज्ञानवञ्चक हैं ॥ ३८ ॥ हे हनूमान्! सच्चिदानन्दरूप मेरे उन तीन कारणगुणों की ब्रह्मा, इन्द्र आदि देवतागण भी निरन्तर उपासना करते हैं ॥ ३९ ॥ इसलिये हे कपीश्वर ! तुम मेरे वाक्यों में आदर रखकर ही जीवन्मुक्ति के अर्थ कारणस्वरूप मेरे तीनों गुणों की उपासना करो ॥ ४० ॥ इस संसार में ये तीनों गुण गुणशब्दवाच्य होने पर भी अन्यत्र कारणरूप में गुणशब्दवाच्य नहीं हैं। इन दोनों से अतिरिक्त ये गुणत्रय निष्प्रतियोगि अवस्था में अर्थात् निर्द्वन्द्व अवस्था में गुण

तस्माद्गुणैरेव गुणान्विहाय
सुमेरुवत्सुस्थिरबोधनिष्ठः।
उपाश्रय त्वं त्रिगुणान् क्रमेण
समाधिभिर्मे भृशदग्धलङ्क ॥४२॥

इति तत्त्वसारायण उपासनाकाण्डस्य द्वितीयपादे सर्ववेद-
रहस्यार्थासु श्रीरामगीतासूपनिषत्सु गुणत्रयविभाग-
योगनिरूपणं नामैकादशोऽध्यायः॥

और अगुण नामक अवस्था से दूर हो जाते हैं ॥ ४१ ॥ इस कारण कारणगुणों से ही कार्यगुणों को छोड़कर, हे लङ्का के पूर्णतया जलानेवाले ! मेरु के समान सुस्थिर ज्ञाननिष्ठ होकर तुम समाधियों के द्वारा मेरे सच्चिदानन्दरूप त्रिगुणों का क्रमशः आश्रय करो * ॥ ४२ ॥

इस प्रकार तत्त्वसारायण के अन्तर्गत उपासनाकाण्ड के
द्वितीय पाद में कथित समस्त वेदों के अर्थों को प्रकाश
करनेवाली श्रीरामगीताउपनिषद् का गुणत्रय-
विभागयोगनिरूपण नामक एकादश
अध्याय समाप्त हुआ॥

---

* यहां जो दो श्रेणी के गुण कहे गये हैं वास्तव में वे दोनों सकल शास्त्रों में गुण नहीं कहाते हैं। एक तो प्रकृति के सत्त्व रज और तमरूपी त्रिगुण हैं और दूसरे आत्मा के सत् चित् और आनन्दरूपी त्रिभाव हैं। "गुणैः सृष्टिस्थित्यन्ताभावैस्तदनुभव इति महर्षिरङ्गिराः"।

विश्वरूपनिरूपणम्।

हनूमानुवाच।

रामचन्द्र ! दयासिन्धो ! विश्वरूपं तवाऽद्भुतम्।
श्रोतुमिच्छामि दासोऽहं जानकीप्राणवल्लभ ! ॥ १ ॥

श्रीराम उवाच।

हनूमञ्छृणु वक्ष्यामि विश्वरूपं ममाद्भुतम्।
दर्शयिष्यामि भीमाय यत्त्वमेव कपीश्वर ! ॥ २ ॥
वाचामगोचरमथापि च मत्स्वरूपं,
प्रेम्णा वशीकृतमतिस्त्वयि तत्प्रवक्ष्ये।
मायाविलासपरिकल्पितचित्रगात्रं,
श्रोतव्यमेव भवता नतु गच्छ भीतिम् ॥ ३ ॥

हनूमान्‌जी बोले :—हे रामचन्द्र ! हे दयासिन्धो ! आपका अद्भुत विश्वरूप मैं सुनना चाहता हूं, हे जानकीनाथ ! मैं आपका दास हूं ॥ १ ॥ श्रीरामचन्द्रजी ने कहा :—हे हनूमान् ! सुनो। मैं अपना अद्भुत विश्वरूप तुमसे कहूंगा और हे कपीश्वर ! तुम भीमस्वरूप को वह दिखाऊंगा जो रूप तुम ही हो ॥ २ ॥ प्रेमके द्वारा तुमने मेरा चित्त वशीभूत कर लिया है; अतः वाणी से अगोचर है तौभी वह अपना रूप तुमसे कहूंगा जिस के माया के विलास से विचित्र अङ्ग कल्पित हैं वह सुनने योग्य ही है, भय न करो ॥ ३ ॥ हनूमान्‌जी बोले :—हे स्वामिन् ! एक तो आपका

हनूमानुवाच ।

स्वामिन् ! सकृच्छ्रवणमात्रसमस्तभीति-
ध्वंसप्रवीणबहुमङ्गलादिव्यगात्रे ।
ते सर्व्वदाप्यभयवादिमुखारविन्दा-
दद्य श्रुते मम कथं भयमुद्भवेद्वा ॥ ४ ॥

श्रीराम उवाच ।

मैवं कपे ! वद विधीन्द्रमुखास्सुरास्ते,
शृण्वन्त एव भयमाप्नुयुरप्यहो यत् ।
स्मृत्वा ममापि पुलकातत एष देहः,
सम्प्रत्यवाप्स्यति भवानपि तेन मूर्च्छाम् ॥ ५ ॥

अनेक मङ्गलमय दिव्य शरीर है जिसका वर्णन केवल एकवार सुनना ही समस्त भयों का नाश करने में समर्थ है, द्वितीयतः आपके मुखकमल से निरन्तर अभय वचन ही निःसृत होते हैं, फिर आपके मुखसे उस विश्वरूप * को सुनकर आज मैं भयभीत क्योंकर होऊँगा ? ॥ ४ ॥ श्रीरामचन्द्रजी बोले :—हे कपे ! ऐसा न कहो, जब कि ब्रह्मा, इन्द्र आदि देवतागण भी अहो (मेरे उस रूप के वर्णन को) सुनते ही डरगये, जब कि उसका स्मरण करने से मेरे इस देह में भी रोंगटे खड़े हो जाते हैं, तब तुम भी इस समय उसे सुनकर मूर्च्छित होजाओगे ॥ ५ ॥ जिसके

* मन वचन और बुद्धि से अतीत परमेश्वर के स्वरूप को शास्त्रों में तीन भाव से वर्णन किया है। सृष्टि से अतीत माया से परे अद्वितीय स्वस्वरूप का नाम ब्रह्म है, ब्रह्म जब अपनी प्रकृति को देखते हैं वही सगुणरूप ईश्वर कहाता है और अनन्त ग्रह उपग्रहों से पूर्ण स्थूल प्रपञ्चमय अनन्तरूपधारी जो स्थूलरूप है वही विराट् कहाता है । विष्णुगीता भगवद्गीता शक्तिगीता धीशगीता सूर्य्यगीता आदि सब में इस विराट्रूप का स्वतन्त्र स्वतन्त्र वर्णन है । शम्भुगीता में इसी को शिवलिङ्ग करके वर्णन किया है । इस विराट् रूप का ध्यान करने से मन स्तम्भित और बुद्धि थकित होजाती है ।

सत्सर्वतो विपुलदुर्ग्रहपाणिपादं,
यत्सर्वतोऽक्षिमुखनासिकमस्तकञ्च।
यत्सर्वतः श्रवणकण्ठभुजोरुनाभि-
जानूरु तद्बृहदखण्डवपुः स्मर त्वम्॥ ६॥
तन्नासिकाबिलमवाप्य चतुर्दशैता-
न्युच्छ्वासतो मशकवद्भुवनानि तस्मात्।
निश्वासतश्च विरलानि पुनः पुनर्वै,
निर्यान्ति मर्कट! बहिः क्वचिदेव देहे॥ ७॥
ब्रह्माण्डकोट्य इतस्तत एव केशे,
व्याप्ते क्वचिन्मम तु संशयिताऽस्ति भावः।
लग्ना भवन्ति परमाणुसमानरूपाः,
शाखोपशाखिवटशाखिनि बीजवत्ताः॥ ८॥

विशाल हाथ पैर सर्वत्र व्याप्त हैं, जिन्हें कोई स्पर्श नहीं कर सकता, जिसकी आँखें, मुख, नासिकाएँ, मस्तक सर्वत्र व्याप्त हैं, जिसके कर्ण, कण्ठ, भुजाएँ, ऊरु, गभीर नाभि, जानु सर्वत्र व्याप्त हैं, उस महान् और अखण्डशरीर का तुम स्मरण करो ॥ ६ ॥ हे मर्कट! उस देह के नासिकाबिलमें ये चौदहों भुवन उच्छ्वास के साथ मशकके समान भीतर जाकर और उससे निःश्वासके साथ पुनः पुनः वे विरल (अलग अलग) होकर देहमें कहीं बाहर निकल आते हैं॥ ७॥ मेरे व्याप्त केशों में इधर उधर करोड़ों ब्रह्माण्ड हैं इसी से भास होता है कि मानो! शाखा उपशाखाओं से युक्त वटवृक्ष में वटबीज के समान परमाणुस्वरूप वे ब्रह्माण्डसमूह चिपके हुए हैं ॥ ८॥ उस विराट्रूप के कुछ मुख तो अत्यन्त

स्थूलानि यत्तद्वदनानि कानिचि-
दीर्घाणि ह्रस्वाणुतराणि कानिचित्।
पादादयश्चैवमतः प्रसादितै-
स्तद्दर्शनीयं भुवि धीरमानसैः ॥ ९ ॥
यस्यैव गण्डूषपयांसि सागरा-
स्सप्ताऽपि नासामलवत्सरिद्वराः।
मेर्वादयः कर्णमलानि पर्वताः,
दृ.क्रः पुमान् कोस्त्यभयं तदीक्षणे ॥ १० ॥
खद्योतवद्यत्र भवन्ति भास्करा-
माध्यन्दिना अप्यतिदुर्विभावनाः।

विशाल तथा स्थूल और कुछ मुख अणु तथा सूक्ष्म हैं, इसी प्रकार चरण आदि भी हैं; अतः वह रूप पृथ्वी पर उन्हीं पुरुषों के द्वारा देखने योग्य है जिनपर ईश्वर की कृपा है और जो दृढचेता हैं *॥ ९ ॥ सातों समुद्र ही जिसके कुल्लेके जलके समान हैं, श्रेष्ठ नदियाँ जिसकी नासिका के मलके समान हैं, मेरु आदि पर्वत जिसके कान के मलके समान हैं, उस रूपको निडर होकर कौन पुरुष देखने में समर्थ हो सकता है ?॥ १० ॥ जहां अत्यन्त प्रखर मध्याह्न के सूर्य भगवान् भी जुगनू के समान

* एक सूर्य के अधीन जो सैकड़ों ग्रह उपग्रह रहकर एक समष्टि आकार धारण करते हैं उसी एक लोकसमष्टि का नाम एक ब्रह्माण्ड है । प्रत्येक ब्रह्माण्ड में एक एक ब्रह्मा विष्णु महेश रहकर सृष्टि स्थिति लय–कार्य्य करते हैं, ऐसे ब्रह्माण्ड दशों दिशाओं में अनन्त हैं । इस विराट् रूप में भगवान् के दर्शन करते हुए किसका मन मूर्च्छित और बुद्धि स्तम्भित नहीं होजाती है ।



बृहत् राम पंचायतन ।

घोराट्टहासत्रुटिताण्डभित्तिकं,
वक्ष्ये कथं तन्मम रूपवैभवम् ॥ ११ ॥
दंष्ट्राकरालाननपुञ्जदर्शना-
द्भीतैः कृतान्तैर्बहुभिः पलायितम् ।
गन्तव्यदेशान्तरलेशहाम्भितो,
यत्रैव संमूर्च्छितमद्भुते स्वयम् ॥ १२ ॥
इन्द्राश्च यद्भग्नसहस्रलोचनाः,
पतन्ति यत्रैव रुदन्ति चाधिकम् ।

प्रतीत होते हैं और जिसके घोर अट्टहास से ब्रह्माण्ड की दीवालें टूट जाती हैं, उस मेरे रूपका वैभव मैं क्या कहूं ! ॥ ११ ॥ दंष्ट्राओं (दाढ़ों) से विकराल बने हुए अनेक मुखों के दर्शन से डरकर अनेक यमराज * भागे, परन्तु भाग जाने योग्य अन्य देशका कोई भी अंश बच नहीं रहाथा; अतः इसी अद्भुत विराट् रूप में वे स्वयं मूर्च्छित होगये ॥ १२ ॥ जिस रूप के देखने से फूटी हुई सहस्र आँखोंवाले अनेक इन्द्र † अधिक रोते

* प्रत्येक लोकसमष्टिरूप ब्रह्माण्ड का केन्द्र सूर्य्यमण्डल होता है । प्रत्येक ब्रह्माण्ड के चौदह अंश होते हैं वही सप्त स्वर्ग और सप्त पाताल कहाते हैं । उन्हीं सप्त स्वर्गों में से भूलोक एक ब्रह्माण्ड का एक चौदहवां हिस्सा है । पुनः भूलोक चार हिस्सों में विभक्त है, उन्हीं चारों का नाम यह है यथा—पितृलोक मृत्युलोक प्रेतलोक और नरकलोक ४। हमारे भूलोक का स्वर्गलोक पितृलोक है, हमारी यह वासभूमि मृत्युलोक कहाती है । प्रेतलोक और नरकलोक के राजा यमराज हैं । ये दोनों लोक कारागृह अर्थात् जेलखाने सदृश हैं ।

† सप्त पाताल में असुर वसते हैं और सप्त स्वर्ग में देवता बसते हैं । असुरों की राजधानी सातवें लोक में है और वहीं असुरों के राजा रहते हैं । देवताओं की राजधानी तीसरा स्वर्ग जो स्वर्लोक कहाता है उसमें हैं । देवताओं के राजा का नाम इन्द्र है । इन्द्र एक पद है उस पद का अधिकारी यदि स्वधर्म्मनिरत हो तो आगे बढ़ जाता है, नहीं तो उसका पतन होता है ।

स्वेषां विनिन्दन्ति च निर्निमेषतां,
भवन्त्यचेष्टा बत मुग्धचेतसः ॥ १३ ॥
यन्नाभिपङ्कषु बृहत्तमा अपि,
स्थिरा रजोवद्बहवश्चतुर्मुखाः ।
चण्डाट्टहासत्रुटिता लुठन्त्यहो,
मृगाः पवेः पर्वतकन्दरेष्विव ॥ १४ ॥
संवर्तकालोद्भटपावका भृशं,
दग्धा अरूपं गमिता यतोऽचिरात् ।
अमध्यमाद्यन्तविहीनमद्भुतं,
विचिन्तय त्वं पवनात्मज ! स्वतः ॥ १५ ॥

हुए वहीं गिरते हैं और अपनी निर्निमेषता की निन्दा करते हुए खेद है कि किंकर्तव्यविमूढ़ हो मूर्च्छित हो जाते हैं ॥ १३ ॥ जिस रूप के नाभिकमलों में विशालतर आकारवाले अनेक ब्रह्मा * कमलरेणु के समान चिपके हुए हैं वे उस विराट् रूप के प्रचण्ड अट्टहास से अपने स्थान से हटकर ऐसे लुड़कतेहैं जैसे पर्वतपर वज्राघात होने से उसपर सञ्चार करने वाले पशुगण कन्दराओं में अर्थात् गुफाओं में लुडकते हैं ॥ १४ ॥ जिस रूप में प्रलयकाल के प्रचण्ड अग्नि जलकर क्षणमात्र में सम्पूर्ण रूप से बुझ जायँगे, हे पवननन्दन ! उस आदि, मध्य, अन्तहीन अद्भुतरूप का तुम स्वयं स्मरण करो ॥ १५ ॥ वह रूप

* प्रत्येक ब्रह्माण्ड में ईश्वर के प्रतिनिधिरूप से एक ब्रह्मा, एक विष्णु और एक महेश अर्थात् एक रुद्र होते हैं। ब्रह्माण्ड अनन्त हैं इस कारण इन त्रिमूर्त्तियों की भी संख्या अनन्त है; अतः ऐसा कहागया है।

हेमाद्रिवद्भाति कदाचन स्वयं,
मैनाकवद्यच्च कदाचन स्फुटम्।
हेमाद्रिवद्वर्णवरैः कदाचन,
स्वैरं विचित्रैर्निपुणं विभावय॥ १६॥
रेखेव शेषोऽपि यदङ्घ्रिपङ्कजे,
यत्केशगं व्योम मणिर्यथाऽसितः।
विभाति तत्कुण्डलितार्कचन्द्रकं,
स्वान्तर्बहिर्व्यासमखण्डदैहिकम्॥ १७॥
ब्रह्माऽभवत् क्षत्रमिदं यदोदनो,
यस्यैव मृत्युर्मृदुलोपसेचनम्।
अदृष्टदृष्टं मम रूपमश्रुतं,
श्रुतं क एतादृगितीह तर्कयेत्॥ १८॥

कभी हेमाद्रि (सोने के पर्वत सुमेरु) के समान आप ही आप शोभायमान होताहै, कभी मैनाक पर्वत के समान स्पष्ट होजाता और कभी सोने के पर्वत के विचित्रवर्णोंवाला होताहै, उसे तुम भलीभांति स्वाधीनभाव से चिन्ता करो॥ १६॥ शेषनाग जिस रूपके चरणकमल में रेखा के समान हैं, जिसके केशोंपर आकाश नीलमणिके समान प्रतीत होता है, चन्द्र, सूर्य जिसके कर्णकुण्डलसे जान पड़ते हैं, अन्तर्बाह्य में व्याप्त अखण्ड देहवाला वह रूप शोभाको प्राप्त हो रहा है॥ १७॥ जिसके लिये क्षात्रतेज और ब्रह्मतेज भात के समान और मृत्यु कोमल दाल के समान है, इस लोक में ऐसा कौन है जो मेरे उस अलौकिक और अपूर्व रूप की तर्कणा करे॥ १८॥

एवं ब्रुवति सीतेशे हनूमान्मारुतात्मजः।
भावयामास वेगेन तद्रूपं मीलितेक्षणः ॥ १९ ॥
ततस्तद्भावनावेगाद्ध्यानं कुर्वन् भयङ्करम्।
शिथिलाङ्गः स्वयं भूमौ मूर्च्छाक्रान्तः पपात ह ॥ २० ॥
श्रीरामश्च तमालोक्य मुहूर्तं सस्मितं ततः।
निजाभ्यां पाणिपद्माभ्यामुत्थाप्यात्यादरेण च ॥ २१ ॥
अद्भिः सुशीतलैर्मन्दैर्दिव्यव्यजनमारुतैः ॥
स्वयमाश्वासयामास तस्याऽऽसंज्ञोदयं प्रभुः ॥ २२ ॥
स बाष्पगद्गदं पश्चाल्लब्धसंज्ञे मरुत्सुते।
पुनश्च वर्णयामास विश्वरूपं रघूद्वहः ॥ २३ ॥

श्रीजानकीनाथ के इस प्रकार कहने पर वायुपुत्र हनूमान् ने आँखें मूँदकर शीघ्र ही उस रूपकी भावना की ॥ १९ ॥ तदनन्तर उस भावनाके वेगसे भयङ्कर ध्यान करते हुए हनूमान् स्वयं शिथिलाङ्ग हो भूमिपर मूर्च्छित होकर गिरपड़े * ॥ २० ॥ अनन्तर श्रीरामचन्द्र जी ने हनूमान् को इस प्रकार मूर्च्छित अवस्था में क्षणमात्र देख, बहुत आदरके साथ अपने करकमलों से उसे हँसते हुए उठाया॥२१॥ और शीतलजल तथा दिव्य व्यजन (पंखे) की मन्दवायु से जबतक वह सचेत नहीं हुआ, तबतक स्वयं भगवान् उसे आश्वासन करते रहे ॥ २२ ॥ पश्चात् हनूमान् के सचेत होने पर श्रीरामचन्द्रजी ने प्रेमाश्रु से गद्गद होकर विश्वरूप का वर्णन फिर प्रारम्भ किया ॥ २३ ॥ उसको सुनकर अञ्जनीपुत्र हनूमान्जी

* अनन्त ब्रह्माण्डों से पूर्ण श्रीभगवान् की इस विराट् मूर्त्तिका दर्शन बुद्धि से करने पर मन मूर्च्छित और बुद्धि स्तब्ध होजाती है यही इसका तात्पर्य्य है।

तदाकर्ण्याञ्जनासूनुः श्रीरामचरणद्वयम्।
हस्ताभ्यां दृढमालम्ब्य स्तब्धकण्ठ उवाच ह ॥ २४ ॥

हनूमानुवाच।

अहो विचित्रं भगवन्! दयानिधे!
त्वद्विश्वरूपस्य दुरूहवैभवम्।
तद्वर्णनाद्वाचमथोपसंहर-
न्मां पाह्यधीरं वचनान्तरैर्गुरो! ॥ २५ ॥
रूपं हि ते मत्स्मृतिगोचरं मह-
त्पादौ क्वचित्कर्षति मे शयौ क्वचित्।
अङ्गानि चान्यानि तथैव निर्दयं,
न सह्यमेतत्क्षणमप्यहो मया ॥ २६ ॥
मत्प्राणनाथस्त्वमनन्तवैभवः,
सर्व्वात्मकः कोऽप्यसि सर्वशक्तिकः।

ने श्रीरामचन्द्रजी के दोनों चरण अपने दोनों हाथों से दृढ़रूप से पकड़ लिये और रुँधे हुए कण्ठ से वे बोले ॥ २४ ॥ हनूमान्‌जी बोले :—हे दयासागर परमात्मन्! आपके विश्वरूप का वैभव विचित्र और समझने के लिये कठिन है। अहो! अब उसके वर्णन से वाणी को रोककर हे गुरो! मुझ अधीर (भयभीत) की अन्य वचनों से रक्षा करो ॥ २५ ॥ आपके विराट् रूपका जब स्मरण होता है, तब कभी पैरों को, कभी हाथों को और इसी प्रकार अन्य अङ्गों को भी निर्दयता से वह मानो! खैंचता है, जो मुझसे क्षणमात्र भी नहीं सहा जाता ॥ २६ ॥ आप अनन्त

एवं ब्रुवति सीतेशे हनूमान्मारुतात्मजः।
भावयामास वेगेन तद्रूपं मीलितेक्षणः॥ १९॥
ततस्तद्भावनावेगाद्ध्यानं कुर्वन् भयङ्करम्।
शिथिलाङ्गः स्वयं भूमौ मूर्च्छाक्रान्तः पपात ह॥ २०॥
श्रीरामश्च तमालोक्य मुहूर्तं सस्मितं ततः।
निजाभ्यां पाणिपद्माभ्यामुत्थाप्यात्यादरेण च॥ २१॥
अद्भिः सुशीतलैर्मन्दैर्दिव्यव्यजनमारुतैः॥
स्वयमाश्वासयामास तस्याऽऽसंज्ञोदयं प्रभुः॥ २२॥
स बाष्पगद्गदं पश्चाल्लब्धसंज्ञे मरुत्सुते।
पुनश्च वर्णयामास विश्वरूपं रघूद्वहः॥ २३॥

श्रीजानकीनाथ के इस प्रकार कहने पर वायुपुत्र हनूमान् ने आँखें मूँदकर शीघ्र ही उस रूपकी भावना की॥ १९॥ तदनन्तर उस भावनाके वेगसे भयङ्कर ध्यान करते हुए हनूमान् स्वयं शिथिलाङ्ग हो भूमिपर मूर्च्छित होकर गिरपड़े *॥ २०॥ अनन्तर श्रीरामचन्द्र जी ने हनूमान् को इस प्रकार मूर्च्छित अवस्था में क्षणमात्र देख, बहुत आदरके साथ अपने करकमलों से उसे हँसते हुए उठाया॥२१॥ और शीतलजल तथा दिव्य व्यजन (पंखे) की मन्दवायु से जबतक वह सचेत नहीं हुआ, तबतक स्वयं भगवान् उसे आश्वासन करते रहे॥ २२॥ पश्चात् हनूमान् के सचेत होने पर श्रीरामचन्द्रजी ने प्रेमाश्रु से गद्‌गद होकर विश्वरूप का वर्णन फिर प्रारम्भ किया॥ २३॥ उसको सुनकर अञ्जनीपुत्र हनूमान्जी

* अनन्त ब्रह्माण्डों से पूर्ण श्रीभगवान् की इस विराट् मूर्तिका दर्शन बुद्धि से करने पर मन मूर्च्छित और बुद्धि स्तब्ध होजाती है यही इसका तात्पर्य्य है।

तदाकर्ण्याञ्जनासूनुः श्रीरामचरणद्वयम्।
हस्ताभ्यां दृढमालम्ब्य स्तब्धकण्ठ उवाच ह ॥ २४ ॥

हनूमानुवाच।

अहो विचित्रं भगवन्! दयानिधे!
त्वद्विश्वरूपस्य दुरूहवैभवम्।
तद्वर्णनाद्वाचमथोपसंहर-
न्मां पाह्यधीरं वचनान्तरैर्गुरो! ॥ २५ ॥
रूपं हि ते मत्स्मृतिगोचरं मह-
त्पादौ क्वचित्कर्षति मे शयौ क्वचित्।
अङ्गानि चान्यानि तथैव निर्दयं,
न सह्यमेतत्क्षणमप्यहो मया ॥ २६ ॥
मत्प्राणनाथस्त्वमनन्तवैभवः,
सर्व्वात्मकः कोऽप्यसि सर्वशक्तिकः।

ने श्रीरामचन्द्रजी के दोनों चरण अपने दोनों हाथों से दृढ़रूप से पकड़ लिये और रुँधे हुए कण्ठ से वे बोले ॥ २४ ॥ हनूमान्‌जी बोले :—हे दयासागर परमात्मन्! आपके विश्वरूप का वैभव विचित्र और समझने के लिये कठिन है। अहो! अब उसके वर्णन से वाणी को रोककर हे गुरो! मुझ अधीर (भयभीत) की अन्य वचनों से रक्षा करो ॥ २५ ॥ आपके विराट् रूपका जब स्मरण होता है, तब कभी पैरों को, कभी हाथों को और इसी प्रकार अन्य अङ्गों को भी निर्दयता से वह मानो! खैंचता है, जो मुझसे क्षणमात्र भी नहीं सहा जाता ॥ २६ ॥ आप अनन्त

यद्दुर्बलानामपि दुर्बलोऽभवं,
मां पाहि कारुण्यरसार्द्रवीक्षणात् ॥ २७॥
का वा गतिर्मे भवदङ्घ्रिपङ्कज-
द्वयावलम्बं विधिदुर्लभं विना।
यत्पुण्डरीकाक्ष ! भवामि दुर्मतिः,
कपिश्च हीनो भुवि लक्ष्मणाग्रज !॥ २८॥
मायां त्वदीयां रघुनाथ ! दुस्तरा-
मेनामजानन्नहमेष मोहितः।
मेने पुराधीरतरत्वमात्मनो
गुरोऽपराधं तममुं क्षमस्व मे ॥ २९॥
त्वद्विश्वरूपस्फुरणं विनाऽप्यदः,
प्रकृष्टपापौघनिकृन्तनक्षमम्।

वैभवशाली सर्वव्यापक, सर्वशक्तिमान्, अनिर्वचनीय और मेरे प्राणों के स्वामी हैं; क्योंकि दुर्बलों से भी मैं दुर्बल हो गया हूँ; अतः आप करुणारस से भीगी हुई दृष्टि से मेरी रक्षा करें॥२७॥ हे लक्ष्मणके ज्येष्ठ भ्राता कमललोचन श्रीरामचन्द्रजी ! ब्रह्मा के लिये भी दुर्लभ ऐसे आपके दोनों चरणकमलों का अवलम्ब किये विना मेरी क्या गति होगी ? क्योंकि मैं पृथ्वी पर एक दुर्मति और नीच बन्दर हूं ॥ २८॥ हे रघुनाथजी ! आपकी इस अपार माया को न जानने के कारण ही मैं मोहित हो गया। पहिले मैं अपने आपको दृढ़तर समझता था, हे गुरो ! मेरे उस अपराध को आप क्षमा करें ॥ २९॥ हे भगवन् ! कठिन पापोंके

त्वन्निर्गुणात्माधिगतो मयेति य-
स्तन्नाऽपराधं भगवन् ! क्षमस्व मे ॥ ३० ॥
मायामयत्वात्सगुणस्य पूर्णता,
नैवोपपन्नेति मया हि निश्चितम्।
अन्तर्बहिस्सन् पुरुषोत्तम ! प्रभो !
तन्नाऽपराधं कृपया क्षमस्व मे ॥ ३१ ॥
श्रीजानकीलौल्यमपारमन्वहं,
दृष्ट्वा त्वयीशेऽप्यविशेषबुद्धयः ।
ममाभवंस्त्वन्महिमाऽविचिन्तना-
न्महापराधं तमहो क्षमस्व मे ॥ ३२ ॥
एवं हनुमते प्राज्ञे ब्रुवति स्वरसं वचः।
सबाष्पञ्च सरोमाञ्चं सकम्पञ्च सगद्गदम् ॥ ३३ ॥

समूहका नाश करने में समर्थ, आपके इस विश्वरूपका स्फुरण (ज्ञान) विना ही जो मैं समझ चुका था कि आपके निर्गुण आत्मस्वरूप को पागया, इस मेरे अपराध को भी आप क्षमा करें ॥ ३० ॥ हे प्रभो ! मायामय होनेसे आपके सगुणरूपकी पूर्णता नहीं हो सकती, यह जो मैं निश्चय करचुकाथा, इस मेरे अपराध को कृपाकर आप क्षमा करें; क्योंकि हे पुरुषोत्तम ! आप अन्त-र्बाह्यमें व्याप्त हैं ॥ ३१ ॥ श्रीजानकीजी में आपकी अहर्निश अपार प्रीति देख ईश्वरस्वरूप आपके विषय में भी मेरे मन में अहो ! आपकी महिमाका चिन्तन न करने से अनेक साधारण भाव उत्पन्न हुए थे, मेरे इस महाअपराध को आप क्षमा करें ॥ ३२ ॥ आँखों

श्रीरामचन्द्रो दयया भक्तवात्सल्यगर्भितम्।
मृदुलं वचनं श्लक्ष्णं महात्मा तमुवाच ह॥ ३४॥

श्रीराम उवाच।

हनूमन्निदमास्तां ते वचनं भवमुक्तये।
अवशिष्टांस्त्वमालोच्य परिपृच्छ पुनश्च माम्॥ ३५॥

इति तत्त्वसारायण उपासनाकाण्डस्य द्वितीयपादे सर्व-
वेदरहस्यार्थासु श्रीरामगीतासूपनिषत्सु विश्वरूप-
निरूपणं नाम द्वादशोऽध्यायः॥

में आँसू भरकर रोमाञ्चित हो काँपते हुए गद्गदकण्ठ से इसप्रकार बुद्धिमान् हनूमान्जी के सरस वचन कहने पर महात्मा श्रीरामचन्द्रजी ने दयासे युक्त होकर भक्तवत्सलता से पूर्ण, मधुर और कोमल वचन हनूमान्जी से कहा॥ ३३—३४॥ श्रीरामचन्द्रजी बोले:—हे हनूमान्! तुम्हारा यह वचन संसार से मुक्ति पाने के लिये पर्याप्त होगा। और कुछ शेष शङ्काएँ रह गई हों, उनको सोचकर पुनः मुझसे पूछो॥ ३५॥

इस प्रकार तत्त्वसारायण के अन्तर्गत उपासनाकाण्ड के द्वितीय
पाद में कथित समस्त वेदों के अर्थों को प्रकाश करनेवाली
श्रीरामगीताउपनिषद् का विश्वरूपनिरूपणनामक
द्वादशवाँ अध्याय समाप्त हुआ।

तारकप्रणवविभागयोगः।

हनूमानुवाच।

आपदामपहर्त्रे ते दात्रे निखिलसम्पदाम्।
सर्वलोकाभिरामाय श्रीरामाय नमो नमः॥ १॥
केशवाय नमस्तुभ्यं नमो नारायणाय ते।
माधवाय नमस्तुभ्यं गोविन्दाय नमो नमः॥ २॥
विष्णवे च नमस्तुभ्यं मधुसंसूदनाय ते।
नमस्त्रिविक्रमायापि नमस्ते वामनाय च॥ ३॥
श्रीधराय नमस्तुभ्यं हृषीकेशाय ते नमः।
पद्मनाभाय च नमो नमो दामोदराय च॥ ४॥

हनूमान्‌जी बोले :—आपदाओंको हरनेवाले, सम्पूर्ण सम्पदाओं को देनेवाले, समस्त लोकों में मनोहर आप—श्रीरामचन्द्रजी को वारम्वार प्रणामहै॥१॥ केशी दैत्यके मारनेवाले हे केशव! आपको प्रणामहै। जलमें शयन करनेवाले हे नारायण! आपको प्रणाम है। लक्ष्मीके पति हे माधव! आपको प्रणामहै। इन्द्रियोंके दमनकरनेवाले हे गोविन्द! आपको वारम्वार प्रणामहै॥ २॥ सर्वव्यापक हे विष्णु! आपको प्रणामहै। 'मधु' नामक दैत्यके मारनेवाले हे मधुसूदन! आपको प्रणाम है। तीन पादों में त्रिभुवन को नापनेवाले हे त्रिविक्रम! आपको प्रणाम है। वामनरूपधारी हे वामन! आपको प्रणाम है॥ ३॥ शोभाको धारण करनेवाले हे श्रीधर! आपको प्रणाम है। इन्द्रियों के स्वामी हे हृषीकेश! आपको प्रणाम है। नाभि में कमल है जिनके, ऐसे हे पद्मनाभ! आपको प्रणाम है। उदर में लोकों को धारण करनेवाले हे दामोदर! आप

नमस्ते मत्स्यरूपाय नमस्ते कूर्मरूपिणे।
नमो वराहरूपाय नृसिंहाय च ते नमः॥ ५॥
वामनाय नमस्तुभ्यं रामाय च नमो नमः।
श्रीरामाय नमस्तुभ्यं बलरामाय ते नमः॥ ६॥
कृष्णाय च नमस्तुभ्यं कल्किरूपाय ते नमः।
मयि प्रसन्नस्सततं जनार्दन! भव प्रभो!॥ ७॥
हरे राम हरे राम राम राम हरे हरे।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ ८॥
इति षोडशकं नाम्नां केचित्संसारतारकम्।
महामन्त्रं बुधाः प्राहुर्जानकीप्राणनायक!॥ ९॥

को प्रणाम है॥ ४॥ हे मत्स्यरूपधारी! आपको प्रणाम है। हे कूर्मरूपधारी! आपको प्रणाम है। हे वराहरूपधारी! आपको प्रणाम है। हे नृसिंह! आपको प्रणाम है॥ ५॥ हे वामन! आपको प्रणाम है। हे परशुराम! आपको वारम्वार प्रणाम है। हे श्रीरामचन्द्र! आपको प्रणाम है। हे बलराम! आपको प्रणाम है॥ ६॥ हे श्रीकृष्ण! आप को प्रणाम है। हे कल्किरूपधारी! आप को प्रणाम है। हे प्रभो! हे अभीष्टप्रद जनार्दन! आप निरन्तर मुझपर प्रसन्न हों॥ ७॥ १ हे हरे! २ हे राम! ३ हे हरे! ४ हे राम! ५ हे राम! ६ हे राम! ७ हे हरे! ८ हे हरे! ९ हे हरे! १० हे कृष्ण! ११ हे हरे! १२ हे कृष्ण! १३ हे कृष्ण! १४ हे कृष्ण! १५ हे हरे! १६ हे हरे!॥ ८॥ हे जानकी-प्राणेश्वर! कुछ पण्डितों ने इन्हीं सोलहनामों के महामन्त्र को संसार से तारने

केचित्तु रामनामेदं काश्यामाब्रह्मकीटकम् ।
मरणावसरे कर्ण इति तारोपदेशतः ॥ १० ॥
अन्ये चाष्टाक्षरं मन्त्रं साक्षात्प्रणवपूर्वकम् ।
नमो नारायणायेति तारकं मन्त्रमुत्तमम् ॥ ११ ॥
अन्ये तु काश्यां तत्तारं शिव इत्यक्षरद्वयम् ।
नमश्शिवाय चेत्येके शैवपञ्चाक्षरं तथा ॥ १२ ॥
अन्ये तु प्रणवं सर्ववेदान्तोदितमव्ययम् ।
एकाक्षरं सदा तारं सर्वाक्षरवरं शुभम् ॥ १३ ॥

वाला कहा है ॥ ६ ॥ और कुछ लोग 'राम' इस नाम का मन्त्र, तारक उपदेश रूपसे, ब्रह्मासे लेकर कीड़े तक के कान में काशी में मरण समय में (शिवजी के द्वारा) कहा जाता है ऐसा कहते हैं ॥१०॥ अन्य कुछ लोग प्रणवपूर्वक नमोनारायणाय (ॐ नमोनारा-यणाय) इसी आठ अक्षरोंवाले श्रेष्ठ मन्त्रको साक्षात् तारक मन्त्र कहते हैं ॥ ११ ॥ और दूसरे कुछ लोग काशी में 'शिव' इन्हीं दो अक्षरों कोही तारक मन्त्र कहते हैं और कुछ लोग 'नमः शिवाय' यही शिवपञ्चाक्षर तारक मन्त्र * है ऐसा कहते हैं ॥१२॥ सब वेदान्तों में कथित, सब अक्षरों में श्रेष्ठ, मङ्गलमय, अविनाशी, एकाक्षर प्रणव (ॐ) ही निरन्तर तारकहै, ऐसा अन्य लोग कहते

* सर्वलोकहितकर सनातन धर्म्म की सगुण उपासना के अनुसार विष्णु शिव गणेश सूर्य्य और शक्ति ये पांच भेद हैं और लीला विग्रह उपासना अर्थात् अवतार-उपासना का छठा भेद मानागया है । इसी क्रम के अनुसार विभिन्न साम्प्रदायिक ग्रन्थों में सगुण उपासना के छः प्रकार के तारक मन्त्र कहेगये हैं। निर्गुण तारक मंत्रका भेद सप्तम माना गया है । शास्त्रों में ऐसा कहागया है कि ये सब सगुण तारक मंत्र अपने अपने अधिकार के उपासकों को आवागमन के चक्र से तारकर तत्तदुपासना के लोकों में पहुँचाकर सालोक्य आदि सगुण मुक्ति प्राप्त कराते हैं । निर्गुण तारक मंत्र सप्तम ऊर्द्ध्व लोक प्रदानकारी है। इसी गति को शास्त्रों में शुक्ल गति भी कहा है।

एवं हि बहुधा विप्रैः प्रोच्यते तारवादिभिः।
तत्रैकं वद निश्चित्य ममोपास्त्यै रघूत्तम ! ॥ १४ ॥
एवं हनूमता पृष्टः श्रीरामः श्रुतिपारगः।
वृहज्जाबालतपनपरिव्राजाऽद्वयाभिधाः ॥ १५ ॥
मुक्तिकान्तास्समस्ताश्च श्रुतिस्तारकगोचराः।
पौर्वापर्य्येण संवीक्ष्य निश्चितार्थमुवाच ह ॥ १६ ॥

श्रीराम उवाच।

हनूमञ्छृणु वक्ष्यामि सावधानमना भृशम्।
येन तारेण झटिति भवाब्धिं त्वं तरिष्यसि ॥ १७ ॥
प्रायेण सर्वमन्त्राणां वैष्णवानां कपीश्वर !।

हैं ॥ १३ ॥ इस प्रकार से तारक मन्त्रको जाननेवाले ब्राह्मणगण अनेकप्रकारके तारक कहते हैं। हे रघुनाथजी ! मुझे उपासना के लिये उनमें से किसी एकका निश्चय करके कहिये ॥ १४ ॥ इस प्रकार श्रीहनूमान्‌जी के प्रश्न करनेपर वेदों में पारङ्गत श्रीरामचन्द्रजी ने वृहज्जाबाल, तपन, परिव्राट् और अद्वय से लेकर मुक्तिकोपनिषद् पर्य्यन्त समस्त श्रुतियों को—जिनमें तारक मन्त्र के सम्बन्धमें विशेष वर्णनहै—पूर्वापर सम्बन्ध से भली भाँति देखकर तारक का निश्चित अर्थ कहना प्रारम्भ किया ॥ १५–१६ ॥ श्रीरामचन्द्रजी बोले:—हे हनूमान् ! जिस तारकमन्त्र से तुम शीघ्र ही संसारसागर से पार होजाओगे, उसे मैं कहूंगा। तुम अत्यन्त सावधानचित्त होकर सुनो ॥ १७ ॥ हे कपीश्वर ! वैष्णवों के तथा शैवों के प्रायः सभी मन्त्रों में संसार से तारने की शक्ति है,

शैवानां चास्ति संसारतारकत्वं न संशयः॥ १८॥
तथापि प्रणवाख्योऽयं मन्त्रः सर्वोत्तमोत्तमः।
यमेव तारकं साक्षान्मुक्त्यै सर्वेप्युपासते॥ १९॥
प्रणवव्यतिरिक्तानां मन्त्राणां भोगमोक्षयोः।
विनियोगो भवेदेष मोक्षमात्रफलः खलु॥ २०॥
स चायं प्रणवोऽकारोकाराद्यैरक्षरैर्युतः।
ओङ्काररूपस्सर्वेषु वेदान्तेषु प्रतिष्ठितः॥ २१॥

इसमें कोई सन्देह नहीं॥ १८॥ तौभी यह प्रणव नामक मन्त्र सबसे श्रेष्ठतम * है और सभी लोग प्रत्यक्ष मुक्ति के लिये इसी तारक मन्त्रकी उपासना करते हैं॥ १९॥ प्रणव के अतिरिक्त जितने मन्त्र हैं, उनका भोग और मोक्ष दोनों में विनियोग होता है; परन्तु इस प्रणव का फल केवल मोक्षप्राप्ति ही है॥२०॥ अकार उकार आदि अक्षरों से युक्त यह ओंकाररूप प्रणव सब वेदान्तों में ही है॥ २१॥ बृहस्पति, शेषनाग आदि तथा अरुन्धती के

